स्वच्छायाकण्ठमालोक्य सगुरूक्तक्रमेण वै ।
सम्मुखं गगनं पश्येन्निर्निमेषस्तथैकधीः ॥
शुद्धस्फटिकसङ्काशः पुरुषस्तत्र दृश्यते ।
न दृश्यते यदा तत्र पुनस्तद्वत् परीक्षयेत् ॥
बहुधा दर्शनेनैव साक्षात्कारी भवेद् ध्रुवम् ।
कस्यचिद् भाग्यतः पश्येद् यदि विश्वोऽक्षिगोचरः ।
भवत्येव न सन्देहो गुरुविश्वासतः शिवे ! ।
गुरुं सम्यक् पूजयित्वा पश्येच्छायां समाहितः ॥
तथा षण्मासपर्य्यन्तं न्मृत्युस्तस्य न विद्यते ।
शिरोहीनं यदा पश्येत् षण्मासाभ्यन्तरे मृतिः ॥
यदा पादौ न दृश्येते भार्य्याहानिर्न संशयः ।
न दृश्येते यदा पाणी भ्रातृहानिर्न संशयः ॥
एतज्ज्ञात्वा सुधीः सम्यक् गङ्गातीरं समाश्रयेत् ।
योगाभ्यासेन सततं प्राणायामेण संस्मृतिः ॥
यथा वा तत्समीपस्थो लक्षं मृत्युञ्जयं जपेत् ।
यो न शक्तो हविष्याशी यतवाग्यतमानसः ॥
मृत्युञ्जयेन सन्देहो ह्यन्यथा मृत्युमृच्छति ।
यदा तु मलिनं पश्येत् ज्वरपीड़ा भवेत्तदा ॥
तस्य शान्तिं प्रकुर्व्वीत शिवसेवां समाहितः ।
रक्तवर्णं यदा पश्येदैश्वर्य्यं भवति ध्रुवम् ॥
मध्यच्छिन्नं यदा पश्येत् शत्रुघातो भवेत्तदा ।
एवं सन्दर्शनाद् देवि ! ज्ञानवान् भवति ध्रुवम् ॥
नारदाय पुरा प्रोक्तं मया पुरुषदर्शनम् ।
तत्प्रसादान्महायोगी भूत्वा लोकांश्चरत्यसौ ॥
स्वच्छायादर्शनं देवि ! कलौ पुरुषलक्षणम् ।
दीर्घायुः समवाप्नोति ज्ञानञ्चापि सुनिर्म्मलम् ॥"

इति योगप्रदीपिकायां उमामाहेश्वरसंवादे छायापुरुषलक्षणं नाम पञ्चमः पटलः ॥ * ॥

"ओम् अस्य श्रीच्छायापुरुषग्रहणमन्त्रस्य ब्रह्मर्षिर्बृहद्गायत्री छन्दः छायादेवी देवता ह्रां बीजं स्वाहा शक्तिः पुरुष इति कीलकं सर्व्वसिद्धिसन्दर्शनसिद्ध्यर्थे जपे विनियोगः । ह्रामित्यादि षड़ङ्गन्यासः ॥ मायया मायया लौं लौं ह्रौं माया शिवविचार्य्या ऋषयः ओँ ह्रौँ अं गां सरस्वति ओँ नमो भगवते भूतशरीरमात्मानमाकाशे दर्शय दर्शय चाँ चाँ चाँ ह्रौँ भैरवाय नमः स्वाहा । इति मन्त्रः ॥

पादाभावे च पुत्त्रं वा बाह्वभावे च बान्धवम् ।
आत्मानं शिरसोऽभावे सर्व्वाभावे कुलक्षयम् ॥
विशीर्णे विहते धृते कुम्भे धूमे च विज्वरम् ।
दुर्भिक्षं जायते घोरं कम्बवे च पराङ्मुखे ॥
संपूर्णे च सुखे स्वच्छे क्षेमलाभं सुसिद्धये ।
हीने रक्ते जये प्रीते उष्णे मृत्युर्न संशयः ॥
पतिभीतिं शस्त्रघातमिति वेदविदो विदुः ।
मृत्युञ्जयं जपन्नेव शान्तिस्तस्य विधीयते ॥
षण्मासे मरणं तस्य शीर्षाद्यपचये विदुः ॥
अथ मृत्युञ्जययन्त्रम् ।
"प्रथमं प्रणवमालिख्य तन्मध्ये साध्यनामकम् ।
बहिरष्टदलं पद्मं यान्तान्तं वसुपत्रके ॥
विलिखेत् षड़कारञ्च केशरेषु सुशोभितम् ।
तद्बहिश्चन्द्रवृत्तं स्यात् षोड़शस्वरकं लिखेत् ॥
द्वारं भूपुरमालिख्य चतुर्द्वारञ्च वारुणम् ।
पार्थिवञ्च चतुष्कोणं चक्रं मृत्युञ्जयं भवेत् ॥
ज्वरादिषर्व्वरोगादिदाहशान्तिकरं परम् ।
मृत्युञ्जयं महाचक्रं सर्व्वरक्षाकरं शुभम् ॥"

अथ ध्यानम् ।
"चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तःस्थितं
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम् ।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावयेत् ॥ * ॥
नत्वा तातगुरुं शिवं गणपतिं मन्त्रं जपेत् सर्व्वदा ।
खे लक्षेत् सततं विलोकनपरः शुक्ले रवौ प्रत्यहम् ॥
खे विलोकनमन्त्रस्तु ।
ओँ ह्रीँ भूचरी खेचरी आत्मानमाकाशे दर्शय सर्व्ववृत्तान्तं कथय कथय हुँ फट् स्वाहा ।
यः पश्येत् सर्व्वगं शान्तमात्मानं सत्यमद्वयम् ।
न तेन किञ्चिदज्ञातं ज्ञातव्यं वावशिष्यते ॥"

इति योगप्रदीपिकायां छायापुरुषोपदेशो नाम षष्ठः पटलः ॥

छायाव्यवहारः, पुं, ज्योतिःशास्त्रोक्ताङ्कविशेषः । अथ छायाव्यवहारे करणसूत्रं वृत्तम् ।

"छाययोः कर्णयोरन्तरे ये तयो-
र्व्वर्गविश्लेषभक्ता रसाद्रीषवः ।
सैकलब्धेः पदघ्नन्तु कर्णान्तरं
भान्तरेणोनयुक्तं दले स्तः प्रभे ॥

उदाहरणम् ।

नन्दचन्द्रैर्मितं छाययोरन्तरं
कर्णयोरन्तरं विश्वतुल्यं ययोः ।
ते प्रभे वक्ति यो युक्तिमान् वेत्त्यसौ
व्यक्तमव्यक्तयुक्तं हि मन्येऽखिलम् ॥

न्यासः




छा ७/२ छाया ४५/२

छायान्तरम् । १९ । कर्णान्तरम् । १३ । अनयोर्व्वर्गान्तरेण । १९२ । भक्ता रसाद्रीषवः । ५७६ । लब्धम् । ३ । सैकस्यास्य । ४ । मूलम् । २ । अनेन कर्णान्तरम् । १३ । गुणितम् । २६ । द्विस्थम् । २६ । भान्तरेण । १९ । ऊनयुते । ७ । ४५ । तदर्द्धे लब्धे छाये $\frac{७}{२}$ $\frac{४५}{२}$ तत्छायो-

र्योगपदमित्यादिना जातौ कर्णौ $\frac{२५}{२}$ $\frac{५१}{२}$

छायान्तरे करणसूत्रं वृत्तार्द्धम् ।
शङ्कुः प्रदीपतलशङ्कुतलान्तरघ्न-
श्छाया भवेद्विनरदीपशिखौच्च्यभक्तः ।

उदाहरणम् ।

शङ्कुप्रदीपान्तरभूस्त्रिहस्ता
दीपोच्छ्रितिः सार्द्धकरत्रया चेत् ।
शङ्कोस्तदार्काङ्गुलसम्मितस्य
तस्य प्रभा स्यात् कियती वदाशु ॥

न्यासः




भूः ३ छाया $\frac{१}{२}$ शङ्कुः $\frac{१}{२}$ प्रदीपशङ्कुतलान्तरम् ३

अनयोर्घातः $\frac{३}{२}$ विनरदीपशिखौच्च्येन । ३ । भक्तौ

लब्धानि छायाङ्गुलानि । १२ ।

अथ दीपोच्छ्रित्यानयनाय करणसूत्रं वृत्तार्द्धम् ।

छायाहृते तु नरदीपतलान्तरघ्ने
शङ्कौ भवेन्नरयुते खलु दीपकौच्च्यम् ।

उदाहरणम् ।

प्रदीपशङ्क्वन्तरभूस्त्रिहस्ता
छायाङ्गुलैः षोड़शभिः समा चेत् ।
दीपोच्छ्रितिः स्यात् कियती वदाशु
प्रदीपशङ्क्वन्तरमुच्यतां मे ॥

न्यासः




भूः ३ छाया $\frac{२}{३}$

शङ्कुः । १२ । छायाङ्गुलानि । १६ । शङ्कुप्रदीपान्तरहस्ताः । ३ । लब्धं दीपकौच्च्यं

हस्ताः $\frac{११}{४}$

प्रदीपशङ्क्वन्तरभूमानानयनाय करणसूत्रं वृत्तार्द्धम् ।

विशङ्कुदीपोच्छ्रयसंगुणा भा
शङ्कूद्धृता दीपनरान्तरं स्यात् ॥

उदाहरणम् । पूर्व्वोक्त एव दीपोच्छ्रायः $\frac{११}{४}$

शङ्कुङ्गुलानि । १२ । छाया । १६ । लब्धाः शङ्कुप्रदीपान्तरहस्ताः । ३ ।

छायाप्रदीपान्तरदीपौच्च्यानयनाय करणसूत्रं सार्द्धवृत्तम् ।

छाययोरग्रयोरन्तरघ्नः प्रभा
छायाप्रमाणान्तरहृद्भवेद् भूः ।